# Shri Ganesha Stuti Brahmanyakrita

# બ્રહ્માણ્યકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Brahmanyakrita

File name : gaNeshastutiHbrahmANyakRRitA.itx

Category : ganesha, mudgalapurANa, stuti, viMshati

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM navamaH khaNDaH | adhyAyaH 1 | 9.1 19-57||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 4, 2024

*sanskritdocuments.org*

# બ્રહ્માણ્યકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્માણ્યૂચુઃ ।
નમસ્તે પરેશાય વિઘ્નાધિપાય પરેષાં સદા સૌખ્યદાત્રે હિતાય ।
સ્વસંવેદ્યરૂપાય ચાનન્દદાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૧૯॥

અનાથાય નાથાય સર્વાત્મનાં તે સદા મોહહીનાય નેતિધરાય ।
શિવાયાથ ત્રૈવિધ્યભાવપ્રદાત્રે નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૦॥

સમાયાથ માયાસ્વરૂપાય દ્વન્દ્વપ્રકાશાય સર્વાત્મકાયૈવ વિષ્ણો ।
મહાનન્દરૂપાય સર્વાતિગાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૧॥

સદા સત્યરૂપાય સર્વાત્મને તે વિકારૈર્વિહીનાય સૂર્યાય ભૂમ્ને ।
અનન્તાય ભેદાદિભિર્વર્જિતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૨॥

અપારસ્વરૂપાય નાનામયાય વિહારેષુ સક્તાય પૂર્ણાત્મકાય ।
મહાશક્તયે શક્તિરૂપાય મોહિન્ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૩॥

નિરોધસ્વરૂપાં સમાસ્થાય બુદ્ધિં નિજાનન્દભ્રાન્તિપ્રદાં સિદ્ધિરૂપામ્ ।
પ્રવિશ્યૈવ તુર્યેષુ બિમ્બાત્મકાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૪॥

તતઃ સાઙ્ખ્યરૂપં વિનિર્માય તુર્યૈસ્તદાકારરૂપાય વૈ બોધકાય ।
સદા સ્વાત્મનિષ્ઠાય સઙ્કલ્પહન્ત્રે નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૫॥

તતો બોધરૂપં વિનિર્માય બોધસ્વરૂપાય માયામયાકારધામ્ને ।
સદા ખેલકાયાથ નાનાપ્રચારિન્નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૬॥

તતો દેહિરૂપાય નિર્માય તં વૈ સદૈકપ્રબોધાય ભ્રાન્તેર્ધરાય ।
સ્વતો ભ્રાન્તિહીનાય સોઽહમ્પ્રદાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૭॥

તતો બિન્દુમાત્રાય નિર્માય બિન્દું ચતુર્ધા ચતુષ્પાદરૂપેણ ખેલિન્ ।
અનન્તસ્વરૂપાય દેહપ્રચાર નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૮॥

તતો નાદરૂપં વિનિર્માય નાદસ્વરૂપાય તત્સ્થાય ચૈતન્યદાય ।
અજાયાથ ત્રૈવિધ્યદેહસ્થિતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૯॥

સમાસ્થાય બાહ્યાન્તરે સંસ્થિતાય વિનિર્માય સૌષુપ્તરૂપં પરાત્મન્ ।
તદાકારરૂપેણ ચાનન્દદાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૦॥

સદા સ્વપ્નરૂપાય સર્વાન્તરસ્થાય સૂક્ષ્માય સત્ત્વાત્મને ખેલકાય ।
વિનિર્માય સૂક્ષ્મં ત્રિધા સંસ્થિતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૧॥

નમસ્તે પ્રભો સ્થૂલરૂપાય તત્ર વિનિર્માય જાગૃત્તદાકારરૂપ ।
સદા હ્યન્નભૂતાય બાહ્યાત્મકાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૨॥

ગણાંસ્તે ગણેશાત્મરૂપેણ સૃષ્ટાંસ્તવાંશાંશ્ચ તાન્ રક્ષ બ્રહ્મેશ દાસાન્ ।
સદા પાદપદ્મે રતાંસ્તે કુરુષ્વ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૩॥

ગજાકારતુણ્ડાય લમ્બોદરાય ચતુર્બાહવે શૂર્પકર્ણાય તુભ્યમ્ ।
ત્રિનેત્રાય પાશાઙ્કુશાદ્યૈર્યુતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૪॥

નરાકારરૂપાય કણ્ઠાદધસ્તાત્તથા હ્યેકદન્તાય રક્તામ્બરાય ।
મહાઽઽખુધ્વજાયાઽઽખુવાહાય નિત્યં નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૫॥

અનન્તપ્રસૂતિશ્ચ તે વામભાગે મહાસિદ્ધિરૂપા તથા દક્ષિણાઙ્ગે ।
ધૃતે પૂર્ણમાયે પરે દેવદેવ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૬॥

સ્વસંવેદ્યનામ્નિ પુરે સંસ્થિતાય પ્રમોદાદિભિઃ સેવ્યમાનાય તુભ્યમ્ ।
તથેક્ષોઃ સમુદ્રે સુલીલાકરાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૭॥

સમાધિસ્વરૂપં ગણેશં સ્તુવીમઃ કથં બ્રહ્મણાં બ્રહ્મભૂતં મહાત્મન્ ।
તથાપિ સ્વબુદ્ધ્યા પ્રમાણૈઃ સ્તુતોઽસિ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૮॥

વયં ધન્યરૂપા ગણાધીશ તે વૈ સ્તવેનાઽથ પૂજાદિના દીનબન્ધો ।
નમસ્તે નમસ્તે પ્રસીદાઽઽશુ ભૂમન્ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૯॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણાધીશં પ્રણેમુસ્તં પ્રજાપતે ।
બ્રહ્માણિ તાન્યથોવાચ હર્ષિતઃ સ ગજાનનઃ ॥ ૪૦॥

(ફલશ્ૃતિઃ ।)
શ્રીગણેશ ઉવાચ ।
વરાન્ બ્રૂત હૃદિસ્થાન્ વૈ બ્રહ્માણિ તુષ્ટિમાગતઃ ।

દાસ્યામ્યનેન સ્તોત્રેણ તપસા દુર્લભાનપિ ॥ ૪૧॥

ભવત્કૃતમિદં સ્તોત્રં મમ સન્તોષકારકમ્ ।
ભવિષ્યતિ ન સન્દેહઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૨॥

યઃ પઠેત્ પાઠયેદ્વાઽપિ શ્રાવયેન્માનવોત્તમઃ ।
સ ભુક્ત્વા હ્યખિલાન્ ભોગાનન્તે સ્વાનન્દગો ભવેત્ ॥ ૪૩॥

વિજયપ્રદમેતદ્ધિ પુત્રપૌત્રપ્રદં ભવેત્ ।
ધનધાન્યપશૂનાં તુ દાયકં પ્રભવિષ્યતિ ॥ ૪૪॥

અઙ્ગહીનજનાનાં તુ સ્વઙ્ગદં રોગનાશનમ્ ।
અલક્ષ્મીસઙ્કટસ્યૈવ દહનં પાઠકારિણામ્ ॥ ૪૫॥

વિદ્યા જ્ઞાનાદિકં સર્વં લભતેઽનેન નિશ્ચિતમ્ ।
ભુક્તિં મુક્તિં બ્રહ્મભૂયં પઠનાત્ શ્રવણાત્ કિલ ॥ ૪૬॥

ષટ્કર્મસાધને સિદ્ધં પરકૃત્યવિનાશનમ્ ।
રાજબન્ધહરં ચૈવ ભવિષ્યતિ સુસેવિનામ્ ॥ ૪૭॥

એકવિંશતિવારં ચૈકવિંશતિ દિનાનિ યઃ ।
પઠતે સ લભેત્ સર્વમીપ્સિતં નાત્ર સંશયઃ ॥ ૪૮॥

એવં ગણપતેર્વાક્યં શ્રુત્વા બ્રહ્માણિ વિઘ્નપમ્ ।
પ્રણમ્ય હર્ષયુક્તાનિ જગુસ્તં ચ પ્રજાપતે ॥ ૪૯॥

બ્રહ્માણ્યૂચુઃ ।
વરદોઽસિ ગણાધીશ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ યયા મહામોહો નશ્યત્યત્ર ન સંશયઃ ॥ ૫૦॥

નિજવ્યાપારજં દેહિ બોધં કથય સર્વપ ।
કાર્યં તચ્ચ કરિષ્યામસ્ત્વદાજ્ઞાવશગાનિ ભોઃ ॥ ૫૧॥

સદાઽસ્મન્નિકટે નાથ તિષ્ઠ સ્વભક્તકારણાત્ ।
નિર્વિઘ્નં કુરુ સર્વત્ર ગજાનન નમોઽસ્તુ તે ॥ ૫૨॥

ત્વત્સમાનિ કુરુષ્વ ત્વમસ્માન્ પાદાશ્રિતાનિ તે ।
ભજતાં સર્વદાતૃણિ ત્વત્પ્રસાદાન્નમોઽસ્તુ તે ॥ ૫૩॥

યદ્યદિચ્છામહે નાથ તત્તત્તુ સફલં ભવેત્ ।
સત્યસઙ્કલ્પજં સૌખ્યં દેહિ નો ગણનાયક ॥ ૫૪॥

એવં તેષાં વચઃ શ્રુત્વા ભક્તિભાવેન તોષિતઃ ।
તથેતિ તાન્યથોક્ત્વાસાવન્તર્ધાનં ચકાર હ ॥ ૫૫॥

અષ્ટૌ વિનાયકાઃ પ્રોક્તાસ્તદ્રૂપેણ ગજાનનઃ ।
તેષાં સામીપ્યગો ભૂત્વાઽતિષ્ઠત્ સર્વાર્થસિદ્ધયે ॥ ૫૬॥

એતત્ સર્વં સમાખ્યાતં સ્વસંવેદ્યસ્ય ચેષ્ટિતમ્ ।
શ્રવણાત્ પઠનાન્નૃણાં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૭॥

ઇતિ બ્રહ્માણ્યકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં નવમઃ ખણ્ડઃ । અધ્યાયઃ ૧ । ૯.૧ ૧૯-૫૭॥

- .. mudgalapurANaM navamaH khaNDaH . adhyAyaH 1 . 9.1 19-57..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganesha Stuti Brahmanyakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*